# Kailasasabhavarnanam 1

# કૈલાસસભાવર્ણનમ્ ૧

## Document Information

Text title : Kailasasabhavarnanam 1

File name : kailAsasabhAvarNanam1.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 32 - sabhAvarNanam | vAvRittashlokAH ||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસસભાવર્ણનમ્ ૧

-। કૈલાસસભાવર્ણનમ્ ૧ શિવરહસ્યાન્તર્ગતમ્ ।-

સ્કન્દઃ-

તસ્યાન્તરે શિવેનૈવ મનસા પરિનિર્મિતાઃ ।
વિંશત્સહસ્રમાનેન આયામોચ્છ્રાયતસ્તદા ॥ ૧॥

પ્રાગ્દક્ષિણે પ્રતીચ્યાં વૈ ચોત્તરે શૂલપાણિના ।
મણિપ્રભાધિકજ્યોતિકૈલાસનગમૌલિગાઃ ॥ ૨॥

કલધૌતનગોદ્દામશિખરે તિલકાયિતાઃ ।
પુમર્થા ઇવ રાજન્ત્યશ્ચતુર્વેદશિખોપમાઃ ॥ ૩॥

રઙ્ગસ્થાનં મહેશસ્ય શમ્ભોસ્સન્ધ્યાનટસ્ય ચ ।
શાતકુમ્ભમહાકુમ્ભસહસ્રેણોપશોભિતાઃ ॥ ૪॥

નિષ્ટપ્તહેમક્લૃપ્તાસ્તે મહામેરુગુહોપમાઃ ।
તત્તત્કુમ્ભમહાસ્તમ્ભસહસ્રપરિશોભિતાઃ ॥ ૫॥

સુબદ્ધમણિસોપાના વેદિકાપટ્ટિકોજ્વલાઃ ।
મરાલરાજવલ્યુત્થમુક્તાભક્ષિતચઞ્ચુકાઃ ॥ ૬॥

- -

નાનારુદ્રાવતારાદિદેવ્યાચ નટનં તદા ।
શમ્ભોર્ગણેન્દ્રતિલકૈર્વૃતચિત્રવિચિત્રિતાઃ ॥ ૨૨॥

- -

ગણહસ્તમહાતાલઝલ્લરીનાદહુઙ્કૃતાઃ ।
રત્નમડુજહુડ્ડારગર્ભિતાન્તરસુન્દરાઃ ॥ ૩૩॥

કાહલાપારગમ્ભીરનાદાપૂરિતદિઙ્મુખાઃ ।
નટજ્ઝણઝણારાવશિઞ્જન્મઞ્જીરનિસ્વનાઃ ॥ ૩૪॥

ગોમુખાનકજોદ્દામગણવક્ત્રાબ્જકારવાઃ ।
શઙ્ખાવલીકૃતાપારધૂત્કારરવગર્જિતાઃ ॥ ૩૫॥

ચતુર્વેદશિખોદ્દામબ્રહ્મવક્ત્રકૃતસ્તુતિઃ ।
વામદેવમહાસામરથન્તરરવાકુલાઃ ॥ ૩૬॥

રાથન્તરોત્થફૂત્કારભાઙ્કૃતાખિલદિક્તટાઃ ।
રાજદ્રાજનહિઙ્કારવૈરાજવરભૂષિતાઃ ॥ ૩૭॥

અષ્ટાવક્ત્રોદિતાત્યચ્છચાષ્ટદંષ્ટ્રારવાકુલાઃ ।
મહાગણેશશુણ્ડાગ્રલગ્નકુઞ્જોત્થનાદિતાઃ ॥ ૩૮॥

ષડાનનકૃતોદ્દામકાહલારવસુન્દરાઃ ।
નન્દિભૃઙ્ગિકૃતાનેકતલઘાતોરુમદ્દલૈઃ ॥ ૩૯॥

ધિક્તાન્ધિક્તનિતિરવૈરશેષમતિયારકૈઃ ।
(ધિક્તાન્ધિક્તનિતિરવૈરશૈવમતિરાવકૈઃ) ।
તણ્ડુડિણ્ડિમનાદોત્થરવસુન્દરદિઙ્મુખાઃ ॥ ૪૦॥

વાણીપાણિમહાવીણા શિવનામાલિમૂર્ચ્છનાઃ ।
તન્ત્રીયન્ત્રિતગાન્ધર્વગીતનાદૈકસુન્દરાઃ ॥ ૪૧॥

નારદાદિમુનિશ્રેષ્ઠસ્તુવદુદ્દામ(તુમ્બુરૂદ્દામ)ગાયનાઃ ।
હાહાહૂહૂકૃતાનેકમુરક્ષર(ભરતાક્ષર)તશિક્ષિતાઃ ॥ ૪૨॥

યક્ષશિક્ષાકલાલાપરઙ્ગતુઙ્ગતરઙ્ગિકાઃ ।
રાગરાગિણિકાક્લૃપ્તરમ્યત્રિસ્થાયિમૂર્છનાઃ ॥ ૪૩॥

તાલમદ્દલજોદ્દામતાન્ધિગિત્યુત્તમધ્વનિઃ ।
વર્હિપિઞ્છામસુભગસ્ફાટિકોત્તમભિત્તિકાઃ ॥ ૪૪॥

મણિનિસ્સાણનારાવપ્રબુદ્ધવરકોકિલાઃ ।
કોકિલાકાકલીરમ્યધ્વનિધ્વનનરઞ્જિતાઃ ॥ ૪૫॥

રત્નપઞ્જરમધ્યસ્થશુકશારિકજારવાઃ ।
મૃદઙ્ગઘનઘોષેણ શિખણ્ડીકૃતતાણ્ડવાઃ ॥ ૪૬॥

ગાયદ્ગન્ધર્વનિકરમુખવીક્ષણકૃન્મૃગાઃ ।
રત્નધારગજાસારપુષ્કરોદ્દામબૃહ્મિતાઃ ॥ ૪૭॥

ગાયદ્ગન્ધર્વનિકરમુખવીક્ષણકૃન્મૃગાઃ ।

રત્નધારગજાસારપુષ્કરોદ્દામબૃહ્મિતાઃ ॥ ૪૭॥

પુણ્ડ્રેક્ષુબદ્ધસુભગસ્તમ્ભરમ્ભાવૃતાસ્સભાઃ ।
મણિવલ્લીતોરણાદિલમ્બિતાન્દોલિતાઃપુનઃ ॥ ૪૮॥

મન્દમારુતસઞ્ચારવિતાનચલિતાલકાઃ ।
શાતકુમ્ભમહાકુમ્ભપૂરિતામૃતધારિકાઃ ॥ ૪૯॥

સુપલ્લવમુખાપારરાજદ્ભૃઙ્ગારસુન્દરાઃ ।
પૂગાપારમહાસારાશ્શમ્ભોસ્તત્રમહાસભાઃ ॥ ૫૦॥

- -

કૢપ્તાસ્તત્ર શિવેનૈવ મનસા મનનેન હિ ।
શાતકુમ્ભમયી તત્ર સભા પ્રાચ્યાં દિશિ સ્થિતા ॥ ૫૧॥

મહારત્નસભા શમ્ભોર્દક્ષિણે ચ પ્રકલ્પિતા ।
રાજતી રજતાદ્રૌ તુ શમ્ભોઃ પશ્ચાત્સભા તદા ॥ ૫૨॥

ચિત્સભાચોત્તરેશમ્ભોઃકલધૌતાચલેસ્થિતા ।
એવઞ્ચતુર્દિક્ષ્વપિતાસ્સન્નાહાનન્દિતાસ્સભાઃ ॥ ૫૩॥

તત્સભાવર્ણનં દેવૈર્બ્રહ્મવિષ્ણુમહેશ્વરૈઃ ।
મૂર્તિમદ્ભિસ્તથા સાઙ્ગૈર્વેદનિશ્વાસ ઈશ્વરઃ ॥ ૫૪॥

ઋગ્વેદસ્તુ તથાપ્રાચ્યામેકવિંશતિશાખકૈઃ ।
સ્તૌતિ તસ્યાં સભાયાન્તુદેવદેવં મહેશ્વરમ્ ॥ ૫૫॥

યજુર્વેદસ્તથા રત્નસભાયાં શતશાખકઃ ।
સ્તૌતિ દેવં વિરૂપાક્ષં બદ્ધાઞ્જલિપુટો મુદા ॥ ૫૬॥

કલધૌતસભાયાન્તુ સહસ્રવરશાખકઃ ।
સ્તૌતિ તત્ર મહાદેવં સામવેદોઽથ સામભિઃ ॥ ૫૭॥

ચિત્સભાયાં તથાથર્વવેદોવિંશત્સ્વશાખકૈઃ ।
સ્તૌતિ દેવં શિરોભિસ્સ્વૈરથર્વૈરીશતુષ્ટિદૈઃ ॥ ૫૮॥

સ્કન્દઃ -

સભાસુ ચ દિવસ્પતિપ્રકટભાનુશીતાંશુષુ ।
સ્ફુરત્વિષિ શિખિદ્યુતિપ્રથિતરત્નગર્ભોદ્ભવ-
પ્રકાશકલિતાસ્પદે નટતિ નૃત્તપારઙ્ગતઃ ॥ ૫૯॥

સભાપતિરતીન્દ્રિયઃ પ્રમથનાથસઙ્ઘૈર્વૃતો-
ઽપ્યનન્તમહિમારસશ્રુતિશિખાચ્છપાલીગતઃ ।
સુરેન્દ્રમકુટીતટીવિઘટિતાચ્છરત્નછવિઃ
પ્રસન્નનખસન્તતિર્વિધિહરીન્દ્રદેવૈસ્સ્તુતઃ ॥ ૬૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસસભાવર્ણનમ્ ૧ - સભાવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૩૨ - સભાવર્ણનમ્ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 32 - sabhAvarNanam . vAvRRittashlokAH ..

Notes:
Skanda સ્કન્દ describes the ornate Sabhā સભા (Assembly) at Kailāsa કૈલાસ lorded by Śiva શિવ (who is thus, the Sabhāpati સભાપતિ); where musical instruments are being played, compositions are being rendered and dances - including the Tāṇḍava તાણ્ડવ - are being conducted by attendees including, Ṣaḍānana ષડાનન, Mahāgaṇeśa મહાગણેશ, Nandi નન્દિ, Bhṛṅgi ભૃઙ્ગિ, Gaṇāḥ ગણાઃ Nārada નારદ, Gandharva ગન્ધર્વ (Hāhā હાહા, Hūhū હૂહૂ), Brahmā બ્રહ્મા, Vīṇā વીણા (Sarasvatī સરસ્વતી), Yakṣa યક્ષ, Rāga-Rāgiṇi રાગ-રાગિણિ et al. The four Veda-s ચતુર્વેદાઃ eulogize Śiva શિવ from their stations in the respective constituent sabhā-s સભાસુ (assemblies) in the four cardinal directions ચત્તુર્દિક્ષ (viz. Ṛgveda ઋગ્વેદ in Śātakumbha(hema/kanaka)sabhā શાતકુમ્ભ(હેમ/કનક)સભા in the East, Yajurveda યજુર્વેદ in Mahāratnasabhā મહારત્નસભા in the South, Sāmaveda સામવેદ in Rajatasabhā રજતસભા in the West, and Atharvaveda અથર્વવેદ in Citsabhā ચિત્સભા in the North).
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasasabhavarnanam 1*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*